# Sheshakrita Hatakeshvara Shiva Stuti 1

# શેષકૃતા હાટકેશ્વરશિવસ્તુતિઃ ૧

## Document Information

Text title : Sheshakrita Hatakeshvara Shiva Stuti 1

File name : sheShakRRitAhATakeshvarashivastutiH1.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 27 sheShakRitahATakeshArchanam | 13-29||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# શેષકૃતા હાટકેશ્વરશિવસ્તુતિઃ ૧

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
ફણામણિગણવ્રજ પ્રભવગર્ભધામામૃત-
પ્રભં વર સુહાટકેશ્વરમહોરુલિઙ્ગોત્તમમ્ ।
સુબિલ્વદલપઙ્કજૈઃ કનકચમ્પકૈર્મલ્લિકા-
કદમ્બકરવીરજૈઃ સુમવરૈઃ પ્રપૂજ્યોરગાઃ ॥ ૧૩॥

લિઙ્ગં હાટકગર્ભમણ્ડિતમહાગર્ભોરુધામસ્થિતં
દિવ્યોત્તુઙ્ગવૃષાધરત્નશિખરદ્વારાઙ્કિતં સુન્દરમ્ ।
પ્રાકારપ્રકરૈરપારગણનાહીનસ્વમૌલીલસ-
ત્સદ્રત્નચ્છવિભિઃ પ્રદીપિતમુમાકાન્તલયેષૂદ્યતાઃ ॥ ૧૪॥

પાતાલગઙ્ગામ્બુઘટીસહસ્ર-
ધારાદિભિઃ ક્ષીરદધિપ્રભાજ્યૈઃ ।
પ્રાજ્યૈર્મધુપ્રભવસારઘટીસહસ્રૈઃ
સચ્છર્કરાફલરસૈરપિ ચેક્ષુનીરૈઃ ॥ ૧૫॥

સન્નારિકેલોદકજમ્બુનીર -
રમ્ભાફલામ્રપ્રભવૈશ્ચ પનસૈઃ ।
ગન્ધોદકૈશ્ચન્દ્ર ઉશીરપાટલા-
તક્કોલકાઙ્કોલસુવાસિતૈર્જલૈઃ ॥ ૧૬॥

આજ્યૈશ્ચ ગવ્યૈર્વર પઞ્ચકાદ્યૈ-
રાલિપ્ય લિઙ્ગં ધવલૈશ્ચવસ્ત્રૈઃ ।
સદ્રત્નભૂષાફણિગોલકાઙ્કિતૈ
રત્નૈશ્ચ નિષ્ટપ્તસુવર્ણયુક્તૈઃ ॥ ૧૭॥

તગરાગરુધૂપસમ્ભવૈ-
રથ ગન્ધૈર્મણિદીપકોટિભિઃ ।
પરિફુલ્લસુપઙ્કજાર્કબિલ્વૈ-

રપિ મલ્લીકરવીરજાજિપુષ્પૈઃ ॥ ૧૮॥

મરુવદમનકસ્રજાદિભારૈઃ
પરિપૂજ્ય પ્રમથાધિપોરુલિઙ્ગમ્ ।
ભુજગા જગતાં મહેશમેવં
વરનૈવેદ્યભરૈઃ ફલૈશ્ચ ભક્ષ્યભોજ્યૈઃ ॥ ૧૯॥

સ્રક્તામ્બૂલદુકૂલવર્યવિહિતાલઙ્કારસચ્ચન્દના-
લિપ્તં લિઙ્ગમુમાપતેઃ પ્રિયતમં નીરાજયન્તિ દ્વિજ
દીપાનાં ચ સહસ્રકૈર્વરમહાકર્પૂરખણ્ડોત્થિત-
જ્વાલાજાલનિરસ્તદિક્તમતતિં તે પન્નગાઃ શઙ્કરમ્ ॥ ૨૦॥

હાટકકટકં મહેશલિઙ્ગે
પરિસંવેષ્ટ્ય મુદાનનોત્થરત્નૈઃ ।
સ્વફણાછદિ સુન્દરેશમૂર્ધ્નિ
વરિવસ્યાભિરહો સમર્ચયન્તિ ॥ ૨૧॥

સ્વચ્છેન્દુધામપરિમણ્ડલ સન્નિભોરુ-
નિષ્ટમરુક્મવરદણ્ડસુમણ્ડિતૈશ્ચ ।
સચ્છત્રપઙ્ક્તિવરચામરકોટિકોટિ-
ભ્રાજત્પતાકનિકરૈર્વ્યજનૈરપારૈઃ ॥ ૨૨॥

આદર્શદર્શવરનાટ્યમહોત્સવોદ્યદ્-
ધ્વાનૈર્જિતામ્બુધિરવૈર્વરદુન્દુભીનામ્ ।
સત્કાહલૈર્વરમૃદઙ્ગસુશઙ્ખનાદૈઃ
સઙ્ઘોષ્ય શઙ્કરમહાલયમધ્યમેવમ્ ॥ ૨૩॥

તૌર્યત્રિકૈર્હરહરેતિ રવૈર્ભુજઙ્ગા
નૃત્યન્તિ લિઙ્ગસવિધે મુદિતાઃ કૃતાર્થાઃ ॥ ૨૪॥

શ્રીરુદ્રવીણાયુતવાણિપાણિ
પદ્મપ્રભોત્થૈર્નખરૈર્નખાગ્રૈઃ ।
તદુક્તિરાગોત્તમગાનધારા
નામ્નાં ચ શમ્ભોશ્ચ નયન્તિ કાલમ્ ॥ ૨૫॥

તદઙ્ગણસુનીલિમાવિધુતકાલિનાનં કુચ-
પ્રકર્ષભુજગાઙ્ગનાઃ પરિલસત્કપોલશ્રિયઃ ।

ચલદ્લનમણ્ડનૈઃ પ્રથિતકુણ્ડલાન્દોલનૈ-
ર્નયન્તિ કિલ વીણયા શિવમહેશગાનાદરાઃ ॥ ૨૬॥

તા નાગાભરણોરુલિઙ્ગસદને નૃત્યન્તિ નાગાત્મજાઃ
નાગાસ્યાઃ પ્રસભોરુકાણ્ડસુમહાપાદા ઝણન્નૂપુરાઃ ।
પશ્યેશેતિ હરેતિ શઙ્કરમહાદેવેતિ નિત્યં સદા
વીણાવેણુમૃદઙ્ગનિઃસ્વનલયૈઃ સોમોરુધામાનનાઃ ॥ ૨૭॥

શેષોઽપ્યશેષવદનૈર્ભુજગોરુભૂષ-
પૂષોજ્જ્વલાક્ષભસિતોત્તમભૂષિતાઙ્ગમ્ ।
યોષાર્ધકાય નવમાષનિકાશકણ્ઠં
સન્તોષ્ય શઙ્કરમહો સ્તુવતિ પ્રદોષે ॥

(અસ્તૌત્પ્રદોષસમયે પરિતુષ્ટચેતાઃ) ॥ ૨૮॥

દ્વિજિહ્વફણિભૂષણં શશિહુતાશસૂર્યેક્ષણં
સુપઙ્કજદલેક્ષણં પ્રથિતપૂજયા તોષણમ્ ।
ગરોલ્બણવિશેષણં મદનકાલસંહારણં
કુરઙ્ગશિશુ ધારણં સુરવરાધસત્કારણમ્ ॥ ૨૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શેષકૃતા હાટકેશ્વરશસ્તુતિઃ ૧ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૨૭ શેષકૃતહાટકેશાર્ચનમ્ । ૧૩-૨૯॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 27 sheShakRRitahATakeshArch
. 13-29..

Notes:

Śeṣa (Nāga) શેષ (નાગ); eulogizes Hāṭakeśvara Śiva હાટકેશ્વર શિવ.

Proofread by Ruma Dewan

*Sheshakrita Hatakeshvara Shiva Stuti 1*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*